श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ त्रिसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिसप्ततितमः सर्गः ॥

## इन्द्रजितो ब्रह्मास्त्रेण वानरसेनासहितयोः श्रीरामलक्ष्मणयोर्मूर्च्छा

ततो हतान् राक्षसपुङ्गवांस्तान्
देवान्तकादित्रिशिरोऽतिकायान्।
रक्षोगणास्तत्र हतावशिष्टा -
स्ते रावणाय त्वरिताः शशंसुः ॥ **6.73.1** ॥

ततो हतांस्तान् सहसा निशम्य
राजा महाबाष्पपरिप्लुताक्षः।
पुत्रक्षयं भ्रातृवधं च घोरं
विचिन्त्य राजा विपुलं प्रदध्यौ ॥ **6.73.2** ॥

ततस्तु राजानमुदीक्ष्य दीनं
शोकार्णवे सम्परिपुप्लुवानम्।
रथर्षभो राक्षसराजसूनु -
स्तमिन्द्रजिद् वाक्यमिदं बभाषे ॥ **6.73.3** ॥

न तात मोहं परिगन्तुमर्हसे
यत्रेन्द्रजिज्जीवति नैर्ऋतेश।
नेन्द्रारिबाणाभिहतो हि कश्चित्
प्राणान् समर्थः समरेऽभिपातुम् ॥ **6.73.4** ॥

पश्याद्य रामं सह लक्ष्मणेन
    मद्बाणनिर्भिन्नविकीर्णदेहम्।
गतायुषं भूमितले शयानं
    शितैः शरैराचितसर्वगात्रम्॥ **6.73.5** ॥

इमां प्रतिज्ञां शृणु शक्रशत्रोः
    सुनिश्चितां पौरुषदैवयुक्ताम्।
अद्यैव रामं सह लक्ष्मणेन
    सन्तर्पयिष्यामि शरैरमोघैः॥ **6.73.6** ॥

अद्येन्द्रवैवस्वतविष्णुरुद्र -
    साध्याश्च वैश्वानरचन्द्रसूर्याः।
द्रक्ष्यन्ति मे विक्रममप्रमेयं
    विष्णोरिवोग्रं बलियज्ञवाटे॥ **6.73.7** ॥

स एवमुक्त्वा त्रिदशेन्द्रशत्रु -
    रापृच्छ्य राजानमदीनसत्त्वः।
समारुरोहानिलतुल्यवेगं
    रथं खरश्रेष्ठसमाधियुक्तम्॥ **6.73.8** ॥

समास्थाय महातेजा रथं हरिरथोपमम्।
जगाम सहसा तत्र यत्र युद्धमरिन्दमः॥ **6.73.9** ॥

तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः।
संहर्षमाणा बहवो धनुःप्रवरपाणयः॥ **6.73.10** ॥

गजस्कन्धगताः केचित् केचित् परमवाजिभिः।
व्याघ्रवृश्चिकमार्जारखरोष्ट्रैश्च भुजङ्गमैः॥ **6.73.11** ॥

वराहैः श्वापदैः सिंहैर्जम्बुकैः पर्वतोपमैः।
काकहंसमयूरैश्च राक्षसा भीमविक्रमाः ॥ **6.73.12** ॥

प्रासपट्टिशनिस्त्रिंशपरश्वधगदाधराः।
भुशुण्डिमुद्गरायष्टिशतघ्नीपरिघायुधाः ॥ **6.73.13** ॥

स शङ्खनिनदैः पूर्णैर्भेरीणां चापि निःस्वनैः।
जगाम त्रिदशेन्द्रारिराजिं वेगेन वीर्यवान् ॥ **6.73.14** ॥

स शङ्खशशिवर्णेन छत्रेण रिपुसूदनः।
रराज प्रतिपूर्णेन नभश्चन्द्रमसा यथा ॥ **6.73.15** ॥

वीज्यमानस्ततो वीरो हैमैर्हेमविभूषणः।
चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मताम् ॥ **6.73.16** ॥

स तु दृष्ट्वा विनिर्यान्तं बलेन महता वृतम्।
राक्षसाधिपतिः श्रीमान् रावणः पुत्रमब्रवीत् ॥ **6.73.17** ॥

त्वमप्रतिरथः पुत्र त्वया वै वासवो जितः।
किं पुनर्मानुषं धृष्यं निहनिष्यसि राघवम् ॥ **6.73.18** ॥

तथोक्तो राक्षसेन्द्रेण प्रत्यगृह्णान्महाशिषः।
ततस्त्विन्द्रजिता लङ्का सूर्यप्रतिमतेजसा ॥ **6.73.19** ॥

रराजाप्रतिवीर्येण द्यौरिवार्केण भास्वता।
स सम्प्राप्य महातेजा युद्धभूमिमरिन्दमः ॥ **6.73.20** ॥

स्थापयामास रक्षांसि रथं प्रति समन्ततः।
ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः ॥ **6.73.21** ॥

जुहुवे राक्षसश्रेष्ठो विधिवन्मन्त्रसत्तमैः।
स हविर्लाजसत्कारैर्माल्यगन्धपुरस्कृतैः ॥ **6.73.22** ॥

जुहुवे पावकं तत्र राक्षसेन्द्रः प्रतापवान्।
शस्त्राणि शरपत्राणि समिधोऽथ बिभीतकाः॥ **6.73.23** ॥

लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा।
स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः॥ **6.73.24** ॥

छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः।
सकृदेव समिद्धस्य विधूमस्य महार्चिषः॥ **6.73.25** ॥

बभूवुस्तानि लिङ्गानि विजयं यान्यदर्शयन्।
प्रदक्षिणावर्तशिखस्तप्तकाञ्चनसन्निभः॥ **6.73.26** ॥

हविस्तत् प्रतिजग्राह पावकः स्वयमुत्थितः।
सोऽस्त्रमाहारयामास ब्राह्ममस्त्रविशारदः॥ **6.73.27** ॥

धनुश्चात्मरथं चैव सर्वं तत्राभ्यमन्त्रयत्।
तस्मिन्नाहूयमानेऽस्त्रे हूयमाने च पावके।
सार्कग्रहेन्दुनक्षत्रं वितत्रास नभस्थलम्॥ **6.73.28** ॥

स पावकं पावकदीप्ततेजा
    हुत्वा महेन्द्रप्रतिमप्रभावः।
सचापबाणासिरथाश्वसूतः
    खेऽन्तर्दधेऽऽत्मानमचिन्त्यवीर्यः॥ **6.73.29** ॥

ततो हयरथाकीर्णं पताकाध्वजशोभितम्।
निर्ययौ राक्षसबलं नर्दमानं युयुत्सया॥ **6.73.30** ॥

ते शरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलङ्कृतैः।
तोमरैरङ्कुशैश्चापि वानराञ्जघ्नुराहवे॥ **6.73.31** ॥

रावणिस्तु सुसङ्क्रुद्धस्तान् निरीक्ष्य निशाचरान्।
हृष्टा भवन्तो युध्यन्तु वानराणां जिघांसया॥ **6.73.32**॥

ततस्ते राक्षसाः सर्वे गर्जन्तो जयकाङ्क्षिणः।
अभ्यवर्षंस्ततो घोरं वानराञ्शरवृष्टिभिः॥ **6.73.33**॥

स तु नालीकनाराचैर्गदाभिर्मुसलैरपि।
रक्षोभिः संवृतः सङ्ख्ये वानरान् विचकर्ष ह॥ **6.73.34**॥

ते वध्यमानाः समरे वानराः पादपायुधाः।
अभ्यवर्षन्त सहसा रावणिं शैलपादपैः॥ **6.73.35**॥

इन्द्रजित् तु तदा क्रुद्धो महातेजा महाबलः।
वानराणां शरीराणि व्यधमद् रावणात्मजः॥ **6.73.36**॥

शरेणैकेन च हरीन् नव पञ्च च सप्त च।
बिभेद समरे क्रुद्धो राक्षसान् सम्प्रहर्षयन्॥ **6.73.37**॥

स शरैः सूर्यसङ्काशैः शातकुम्भविभूषणैः।
वानरान् समरे वीरः प्रममाथ सुदुर्जयः॥ **6.73.38**॥

ते भिन्नगात्राः समरे वानराः शरपीडिताः।
पेतुर्मथितसङ्कल्पाः सुरैरिव महासुराः॥ **6.73.39**॥

ते तपन्तमिवादित्यं घोरैर्बाणगभस्तिभिः।
अभ्यधावन्त सङ्क्रुद्धाः संयुगे वानरर्षभाः॥ **6.73.40**॥

ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः।
व्यथिता विद्रवन्ति स्म रुधिरेण समुक्षिताः॥ **6.73.41**॥

रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः।
नर्दन्तस्तेऽनिवृत्तास्तु समरे सशिलायुधाः॥ **6.73.42** ॥

ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवङ्गमाः।
अभ्यवर्षन्त समरे रावणिं समवस्थिताः॥ **6.73.43** ॥

तं द्रुमाणां शिलानां च वर्षं प्राणहरं महत्।
व्यपोहत महातेजा रावणिः समितिञ्जयः॥ **6.73.44** ॥

ततः पावकसङ्काशैः शरैराशीविषोपमैः।
वानराणामनीकानि बिभेद समरे प्रभुः॥ **6.73.45** ॥

अष्टादशशरैस्तीक्ष्णैः स विद्ध्वा गन्धमादनम्।
विव्याध नवभिश्चैव नलं दूरादवस्थितम्॥ **6.73.46** ॥

सप्तभिस्तु महावीर्यो मैन्दं मर्मविदारणैः।
पञ्चभिर्विशिखैश्चैव गजं विव्याध संयुगे॥ **6.73.47** ॥

जाम्बवन्तं तु दशभिर्नीलं त्रिंशद्भिरेव च।
सुग्रीवमृषभं चैव सोऽङ्गदं द्विविदं तथा॥ **6.73.48** ॥

घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणानकरोत् तदा।
अन्यानपि तथा मुख्यान् वानरान् बहुभिः शरैः॥ **6.73.49** ॥

अर्दयामास सङ्क्रुद्धः कालाग्निरिव मूर्च्छितः।
स शरैः सूर्यसङ्काशैः सुमुक्तैः शीघ्रगामिभिः॥ **6.73.50** ॥

वानराणामनीकानि निर्ममन्थ महारणे।
आकुलां वानरीं सेनां शरजालेन पीडिताम्॥ **6.73.51** ॥

हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम्।
पुनरेव महातेजा राक्षसेन्द्रात्मजो बली॥ **6.73.52** ॥

संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणम्।
ममर्द वानरानीकं परितस्त्विन्द्रजिद् बली॥ **6.73.53**॥

स्वसैन्यमुत्सृज्य समेत्य तूर्णं
महाहवे वानरवाहिनीषु।
अदृश्यमानः शरजालमुग्रं
ववर्ष नीलाम्बुधरो यथाम्बु॥ **6.73.54**॥

ते शक्रजिद्बाणविशीर्णदेहा
मायाहता विस्वरमुन्नदन्तः।
रणे निपेतुर्हरयोऽद्रिकल्पा
यथेन्द्रवज्राभिहता नगेन्द्राः॥ **6.73.55**॥

ते केवलं सन्ददृशुः शिताग्रान्
बाणान् रणे वानरवाहिनीषु।
मायाविगूढं च सुरेन्द्रशत्रुं
न चात्र तं राक्षसमप्यपश्यन्॥ **6.73.56**॥

ततः स रक्षोधिपतिर्महात्मा
सर्वा दिशो बाणगणैः शिताग्रैः।
प्रच्छादयामास रविप्रकाशै -
र्विदारयामास च वानरेन्द्रान्॥ **6.73.57**॥

स शूलनिस्त्रिंशपरश्वधानि
व्याविद्धदीप्तानलसप्रभाणि।
सविस्फुलिङ्गोज्ज्वलपावकानि
ववर्ष तीव्रं प्लवगेन्द्रसैन्ये॥ **6.73.58**॥

ततो ज्वलनसङ्काशैर्बाणैर्वानरयूथपाः।
ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः॥ **6.73.59**॥

तेऽन्योन्यमभिसर्पन्तो निनदन्तश्च विस्वरम्।
राक्षसेन्द्रास्त्रनिर्भिन्ना निपेतुर्वानरर्षभाः॥ **6.73.60** ॥

उदीक्षमाणा गगनं केचिन्नेत्रेषु ताडिताः।
शरैर्विविशुरन्योन्यं पेतुश्च जगतीतले॥ **6.73.61** ॥

हनूमन्तं च सुग्रीवमङ्गदं गन्धमादनम्।
जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च॥ **6.73.62** ॥

मैन्दं च द्विविदं नीलं गवाक्षं गवयं तथा।
केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम्॥ **6.73.63** ॥

सूर्याननं ज्योतिर्मुखं तथा दधिमुखं हरिम्।
पावकाक्षं नलं चैव कुमुदं चैव वानरम्॥ **6.73.64** ॥

प्रासैः शूलैः शितैर्बाणैरिन्द्रजिन्मन्त्रसंहितैः।
विव्याध हरिशार्दूलान् सर्वांस्तान् राक्षसोत्तमः॥ **6.73.65** ॥

स वै गदाभिर्हरियूथमुख्यान्
    निर्भिद्य बाणैस्तपनीयवर्णैः।
ववर्ष रामं शरवृष्टिजालैः
    सलक्ष्मणं भास्कररश्मिकल्पैः॥ **6.73.66** ॥

स बाणवर्षैरभिवृष्यमाणो
    धारानिपातानिव तानचिन्त्य।
समीक्षमाणः परमाद्भुतश्री
    रामस्तदा लक्ष्मणमित्युवाच॥ **6.73.67** ॥

असौ पुनर्लक्ष्मण राक्षसेन्द्रो
    ब्रह्मास्त्रमाश्रित्य सुरेन्द्रशत्रुः।

निपातयित्वा हरिसैन्यमस्मा -
    ञ्शितैः शरैरर्दयति प्रसक्तम् ॥ **6.73.68** ॥

स्वयम्भुवा दत्तवरो महात्मा
    समाहितोऽन्तर्हितभीमकायः।
कथं नु शक्यो युधि नष्टदेहो
    निहन्तुमद्येन्द्रजिदुद्यतास्त्रः ॥ **6.73.69** ॥

मन्ये स्वयम्भूर्भगवानचिन्त्य -
    स्तस्यैतदस्त्रं प्रभवश्च योऽस्य।
बाणावपातं त्वमिहाद्य धीमन्
    मया सहाव्यग्रमनाः सहस्व ॥ **6.73.70** ॥

प्रच्छादयत्येष हि राक्षसेन्द्रः
    सर्वा दिशः सायकवृष्टिजालैः।
एतच्च सर्वं पतिताग्र्यशूरं
    न भ्राजते वानरराजसैन्यम् ॥ **6.73.71** ॥

आवां तु दृष्ट्वा पतितौ विसंज्ञौ
    निवृत्तयुद्धौ हतहर्षरोषौ।
ध्रुवं प्रवेक्ष्यत्यमरारिवास -
    मसौ समासाद्य रणाग्र्यलक्ष्मीम् ॥ **6.73.72** ॥

ततस्तु ताविन्द्रजितोऽस्त्रजालै -
    र्बभूवतुस्तत्र तदा विशस्तौ।
स चापि तौ तत्र विषादयित्वा
    ननाद हर्षाद् युधि राक्षसेन्द्रः ॥ **6.73.73** ॥

ततस्तदा वानरसैन्यमेवं
    रामं च सङ्ख्ये सह लक्ष्मणेन।
विषादयित्वा सहसा विवेश
    पुरीं दशग्रीवभुजाभिगुप्ताम्।
संस्तूयमानः स तु यातुधानैः
    पित्रे च सर्वं हृषितोऽभ्युवाच॥ **6.73.74** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः॥